"आरोषं मानिन्यास्तमोदितः कासरं कलमभूमेः।
वद्धमलिं च नलिन्याः प्रभातसन्ध्याप्रसारयति" ॥)

कासारः,पुं, (कास + "तुषारादयश्च" उणां ३।१३९ इति आरन् प्रत्ययः। कस्य जलस्य आसारो यत्र वा। अथवा कासं शब्दं ऋच्छति प्राप्नोति जलगमनपतनादिकाले। ऋ + "कर्म्मण्यण्" ।३।२।१। इति अण्।) सपद्मो निष्पद्मो वा महाजलाशयः। सरोवरः। इत्यमरः। १। १०। २८॥ (यथा,— गीतगोविन्दे २। २०।
"दुरालोकस्तोकस्तवकनवकाशोकलतिका-
विकाशः कासारोपवनपवनोऽपि व्यथयति" ॥)

कासारिः, पुं, (कासस्य अरिः नाशकः।) कासमर्द्दः। इति राजनिर्घण्टः॥

कासालुः, पुं, (कासहेतुः कासजनको वा आलुः।) कन्दविशेषः। कोकणदेशे प्रसिद्ध आलुविशेषः। तत्पर्य्यायः। कासकन्दः २ कन्दालुः ३ आलुकः ४ आलुः ५ विशालपत्रः ६ पत्रालुः ७। अस्य गुणाः। उग्रत्वम्। कफवातश्लेष्मामयारोचकनाशित्वम्। स्वादुत्वम्। पथ्यत्वम्। अग्निदीपनत्वञ्च। इति राजनिर्घण्टः॥

कासीसं,क्ली, (कासों क्षुद्रकासं स्यति नाशयतीति। सो + कः।) उपधातुविशेषः। हिराकसी इति भाषा। (यथा सुश्रुते सूत्रे ३६ अध्याये।
"कासीसकटुरोहिणीजातीकन्दहरिद्रयोः" ॥)
तत्पर्य्यायः। धातुकासीसम् २ खेचरम् ३ धातुशेखरम् ४। इति हेमचन्द्रः॥ केसरम् ५ हंसलोमशम् ६ शोधनम् ७ पांशुकासीसम् ८ शुभ्रम् ९। अस्य गुणाः। कषायत्वम्। शिशिरत्वम्। विषकुष्ठक्रमिखर्ज्जूनाशित्वम् चक्षुर्हितत्वम्। कान्तिवर्द्धनत्वञ्च। इति राजनिर्घण्टः॥ (विस्तृतविवरणमस्य काशीशशब्दे ज्ञेयम्॥)

कासूः, स्त्री, (कशति कुत्सितशब्दं गच्छतीति। कश गतौ + "शित् कशिपद्यतेः"।उणा १। ८७। इति ऊः पृषोदरादित्वात् सत्वम्।) विकलवाक्। शक्तयस्त्रम्। इति मेदिनी॥ (कासते प्रकाशते इति कास् + ऊ।) दीप्तिः। भाषा। इति शब्दरत्नावली॥ रोगः। बुद्धिः। इति हेमचन्द्रः॥

काहका, स्त्री, (काहला इति। पृषोदरादित्वात् लस्य कः।) काहलावाद्यम्। इति द्विरूपकोषः॥

काहलं, क्ली, (कुत्सितं अस्पष्टमव्यक्तं हलं वाक्यं ध्वनिर्वा यत्र। विलेखनार्थकस्यापि हलधातोरत्रधातूनामनेकार्थत्वात् तथात्वम्।) अव्यक्तवाक्यम्। इति हेमचन्द्रः॥

काहलः, पुं, (कुत्सितं यथा स्यात् तथा हलति। लिखति नखैर्भूमिमिति यावत्। हल + अच्। कोः कादेशः।) कुक्कुटः। शब्दमात्रम्। इति मेदिनी॥ विड़ालः। इति शब्दमाला॥ वृहड्ढक्का। तत्पर्य्यायः। महानादः २। इति हारावली॥

काहलः, त्रि, (केन जलेन अहलः अस्पृष्टः।) शुष्कः। भृशम्। खलः। इति मेदिनी॥

काहला, स्त्री, (कुत्सितं अव्यक्तं वा हलति शब्दं करोति। हल + अच् टाप् च।) वाद्यभाण्डभेदः। (ईषदपि न हलं कुत्सितं अङ्गं यस्याः। कोः कादेशः।) अप्सरोविशेषः। इति मेदिनी॥

काहलापुष्पः, पुं, (काहलाकृतिरिव पुष्पमस्याः।) धुस्तूरः। इति शब्दमाला॥

काहली,स्त्री, (कं सुखं आहलति ददातीति। आ + हल + इन्। ततो ङीप्।) तरुणी। युवती। इति मेदिनी॥

काहारकः, पुं, (कुत्सितं शिविकादिकमालम्ब्य जीवनयात्रामाहरति। आ + हृ + ण्वुल्।) शिविकावाहकजातिः। काहार इति वेहारा इति च भाषा। यथा,—
"तथा गायड़िका वीराः क्रूरकर्म्मोपजीवकाः।
व्याधाः काहारकाः पुष्टाः क्षमां संवाहयन्ति ये"॥
इति जैमिनिभारते आश्वमेधिके पर्व्वणि १० अध्यायः॥

काही, स्त्री, (केन वायुना आहन्यते। आ + हन् + डः ङीप्। यद्वा कं सुखं आहन्ति ददाति प्रापयति। आ + हन् + अन्तर्णिजन्तात् डः।ङीप् च।) कुटजवृक्षः। इति राजनिर्घण्टः॥

कि र लि ज्ञाने। इति कविकल्पद्रुमः॥ (ह्रादिं-परं-सकं-सेट्।) र वैदिकः। लि चिकेति। इति दुर्गादासः॥

किं, व्य, किम्। इति मेदिनी॥ (यथा विष्णुपुराणे १ मांशे १७। २४।
"न केवलं तात! मम प्रजानां
स ब्रह्मभूतो भवतश्च विष्णुः।
धाता विधाता परमेश्वरश्च
प्रसीद कोपं कुरुषे किमर्थम्" ॥)

किं, [म्] त्रि, जिज्ञासार्यम्। कि इति भाषा। सर्व्वनामकिम्शब्दस्य क्लीवलिङ्गे रूपमिदम्। इति व्याकरणम्॥ अस्यार्थान्तराणि किम्शब्दे द्रष्टव्यानि॥ (सर्व्वशब्दमयत्वात् विष्णुः। यथा, महाभारते १३। १४९। ९१।
"एको नैकः सवः कः किं यत्तत्पदमनुत्तमम्" ॥)

किंवदन्तिः, स्त्री, (किं + वद + झिच्।) किंवदन्ती। इत्यमरटीकायां भरतः॥

किंवदन्ती,स्त्री,(किम् + वद + झिच् ङीष् च।) जनश्रुतिः। सत्यमसत्यं वा लोकवादः। इत्यमरः। १। ६। ७॥ ("अस्ति किलैषा किंवदन्ती अस्माकं कुले कालरात्रिकल्पा विद्या नाम राक्षसी समुत्पत्स्यते"। इति प्रबोधचन्द्रोदयनाटकम्॥)

किंवा, व्य, (किम् च वा च। इति द्वन्द्वसमासः।) विकल्पः। अथवा। तत्पर्य्यायः। उताहो २ यदि वा ३ यद्वा ४ नेति ५। इति त्रिकाण्डशेषः॥

किंशारुः, पुं, (किं किञ्चित् कुत्सितं वा शृणातीति शॄ हिंसायां + "किञ्जयोः श्रिणः"। उणां १। ४। इति ञुण्।) शस्यशूकम्। शुँश इति भाषा। इत्यमरः। २। ९। २१॥ वाणः। कङ्कपक्षी। इति मेदिनी॥

किंशुकः, पुं, (किञ्चित् अवयवैकदेशः शुक इव शुकतुण्डाभपुष्पत्वात् तथात्वमिति बोध्यम्।) पलाशवृक्षः। इत्यमरः। २। ४। २९॥ (अस्य पर्य्यायो यथा,—भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥
"पलाशः किंशुकः पर्णो यज्ञियो रक्तपुष्पकः।
क्षारश्रेष्ठो वातहरो ब्रह्मवृक्षः समिद्वरः" ॥
यथा गोः रामायणे ६। ६८। ३१।
"तयोः क्षतजमार्गेण देहौ शुशुभाते महात्मनोः।
पुष्पिताविव निष्पत्रौ यथा शाल्मलिकिंशुकौ" ॥
तत्पुष्पादयोऽपि। यथा चाणक्ये ७।
"रूपयौवनसम्पन्ना विशालकुलसम्भवाः।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः" ॥)
विवरणमस्यान्यत् पलाशशब्दे ज्ञातव्यम्॥ नन्दीवृक्षः। इति राजनिर्घण्टः॥

किंशुलुकः, पुं, (किंशुक + निपातनात् साधुः।) पलाशवृक्षविशेषः। इति शब्दरत्नावली॥

किकिः, पुं, (कक + इन्। पृषोदरादित्वात् अादेत्त्वम्।) किकीदिविः। इति शब्दमाला। नारिकेलः। इति राजनिर्घण्टः॥

किकिदिविः, पुं, (किकीति अस्फुटनादेन दीव्यतीति। दिव् + इन्।) चाषपक्षी। इति शब्दमाला॥

किकीदिवः, पुं, (किकीति अव्यक्तशब्देन दीव्यति। दिव + कः।) चाषपक्षी। इति शब्दमाला॥

किकीदिविः, पुं, (किकी इति अस्फुटनादं कुर्व्वन् दीव्यति। "कृविघृष्विच्छविस्थविकिकीदिविः"। उणां ४। ५६ इति किन् निपातनात् सिद्धम्।) स्वर्णचातकः। सोणाचड़ा इति भाषा। नीलकण्ठ इति कश्चित् ख्यातः। इति भरतः॥ तत्पर्य्यायः। चाषः २। इत्यमरः। २। ५। १६॥ चासः ३ किकीदीविः ४। इति भरतः॥ किकी ५ दिविः ६। इति स्वामी॥ किकिः ७ किकिदिवः ८ किकिदीविः ९। इति शब्दमाला॥ किकीदिवः १० स्वर्णचूड़ः ११ इति जटाधरः॥

किकीदीविः, पुं, (किकी इत्यव्यक्तशब्देन दीव्यति क्रीड़ति। निपातनात् दीर्घत्वे साधुः।) चाषपक्षी। इति शब्दमाला॥

किखिः, स्त्री, (खदति हिनस्ति। खद् हिंसायां निपातनात् साधुः।) लघुशृगालः। इति हेमचन्द्रः॥ ख्याँकशेयालि इति भाषा॥

किखिः, पुं, (किखिरिति कुत्सितशब्दं करोति यः।) कपिः। इति भूरिप्रयोगः॥

किङ्करः, त्रि, (किञ्चित् करोति। दिवाविभेत्यत्र किं यत्तद्बहुष्विति अच्।) दासः। इत्यमरः। २। १०। १७॥ (यदुक्तं पुराणे।
"विप्रस्य किङ्करो भूपो वैश्योभूपस्य भूमिप!।
सर्व्वेषां किङ्कराः शूद्रा ब्राह्मणस्य विशेषतः" ॥)

किङ्किणी, स्त्री, (किमपि किञ्चिद् वा कणति। कण शब्दे + इन् + ङीप् च। पृषोदरात् साधुः।) कट्याभरणविशेषः। घाघर इति भाषा। तत्पर्य्यायः। क्षुद्रघण्टिका २। इत्यमरः।२।६।११०॥ कङ्कणी ३। इति भरतः॥ किङ्किणिका ४ किङ्किणिः ५। इति केचित्॥ क्षुद्रघण्टी ६ प्रतिसरा ७ किङ्किणीका ८ कङ्कणिका ९ क्षुद्रिका १०। इति शब्दरत्नावली॥ घर्घरी ११। इति जटा-